# स्वामी विवेकानन्दः

*आध्यात्मिकज्ञानगुरुः महान् दार्शनिकः समाजसंस्कारकः स्वामी विवेकानन्दः विश्वप्रसिद्धो वर्त्तते । लोकसमुदायस्य सर्वविधकल्याणार्थं स सततं यत्नपरः आसीन् । तस्य जीवनचरितमपि उत्तममानवनिर्माणार्थम् आदर्शस्थानीयं भवेदिति धिया विषयोऽयम् उपस्थापितः ।*

महामानवाः दिव्यपुरुषाः । ते अमरधाम्नः पृथिवीम् अवतरन्ति । मानवजातेःधर्मस्य विश्वसमुदायस्य च कल्याणार्थं स्वल्पावधिजीवनकालेते महत् कार्यं साधयन्ति पुनरमरधाम प्रत्यागच्छन्ति च । ज्योतिःपुरुषः सार्थकनामा स्वामी विवेकानन्दः युगाकाशे उज्ज्वलज्योतिष्करूपेण नितरां विभाति । नैराश्यान्धकाराच्छन्ने नभसि यूनां कृतेऽद्यापि स उत्साहोद्दीपनालोकं विकिरति । कालजयिनीभिः समीचीनवाणीभिः लोकान् उद्बोधयति । संसारसागरे जीवनपोतं वाहयतः जनान् कूलमानेतुं दिशः निर्दिशति । योगजन्मनस्तस्य अमृता वाणी धरापृष्ठम् अद्यावधि चिरस्रोताः गङ्गेव चिरं पवित्रीकरोति ।

''कोलकाता'' इति नगरे कुलीने परिवारे शुभे क्षणे १२, जानुयारी , १८६३ मिते दिवसे अस्य महापुरुषस्य जन्म । रत्नगर्भा ''भुवनेश्वरीदेवी'' स्वभावसरलः ''विश्वनाथदत्तः'' चास्य मातापितरौ । विवेकानन्दस्य बाल्यनाम नरेन्द्रनाथस्तस्य माता तं स्नेहेन ''विलु'' इति नाम्ना तम् आहूतवती । माता तम् उक्तवती – ''पुत्र ! आजीवनं पवित्रो भव । आत्मसम्मानं रक्ष, अन्यस्य च सम्मानहानिं मा कुरु'' इति ।

मातुरुपदेशं स स्वजीवने आचरितवान् । बाल्यात् सः ज्ञानपिपासुः ईश्वरविश्वासी ईश्वर जिज्ञासुश्चासीत् । ईश्वरानुसन्धाने व्याकुलोऽसौ रामकृष्णपरमहंसं निकषा गत्वा पृष्टवान् –

''श्रीमन् महाशय ! भवान् भगवन्तं दृष्टवानस्ति'' ?

''हम्, दृष्टवानस्मि, यथा त्वां पश्यामि'' इति उत्तरं रामकृष्णेन प्रदत्तम् । अनेन उत्तरेणैव रामकृष्णपरमहंसे तस्य पूर्णविश्वासो जातः । अथ तमेव गुरुरूपेण स्वीकृतवान् । गुरुणा सोऽपि शिष्यरूपेण स्वीकृतः । योग्यगुरोः योग्यशिष्यस्य च संयोगः देवनिर्दिष्टः । विश्वस्य आध्यात्मिकक्षेत्रे महती परम्परा प्रतिष्ठिता । सत्यमिदम्, अयं शुभमुहूर्तः विश्वकल्याणार्थं चिरादेव प्रतीक्षितः ।

आध्यात्मिकज्ञानवृद्धये स प्राच्यपाश्चात्त्यदर्शनशास्त्राणि अधीतवान् । अतीव मेधाविनस्तस्य स्मृतिः नितरां प्रखरा आसीत् ।

सकृदेव पठनेन श्रवणेन वा स स्मृतिपटले चिराय सर्वं निधातुं शक्नोति स्म ।

तस्य गभीरस्वरः श्रोतृणां हृदयानि स्पृशति स्म । ११ , सेप्टेम्बर , १८९३ मिते दिवसे आमेरिकास्थिते चिकागोनगरे विश्वधर्मसम्मेलने अंशग्रहणं कृत्वा स यदा भाषणप्रारम्भे श्रोतृन् सम्बोधितवान् –''हे मम आमेरिकादेशस्था भ्रातरः भगिन्यश्च'' तदा करतालैः सम्मेलनस्थानं प्रकम्पितमासीत् । ''वसुधैव कुटुम्बकम्'' इति विषयमनुसृत्य भाषणं प्रदाय सकलान् चमत्कृतवान् । न केवलं सनातनधर्मस्य अपि तु मानवधर्मस्य प्रसाराय विभिन्नस्थानेषु समुचितभाषणं दत्त्वा स विश्वविश्रुतो बभूव ।

दरिद्राणां कृते तस्य हृदयं विगलितमासीत् । तेषां साहाय्यार्थं लोकानुद्बोधयति स्म । सन्न्यासी अपि स स्वजनन्याः दुःखानि निवारयितुं सततमचेष्टत । आजीवनं तामपि स्मरति स्म ।

स कथयति –

''यः मातरं यथार्थं पूजयति, सः अवश्यम् उत्तमो मानवो भविष्यति । प्रतिकूलावस्थासु आत्मनः प्रकाशः विकासश्चेति द्वयं नाम सफलं जीवनम् ।'' इति

स यथा वदति, तथा स्वजीवने आचरति ।

कोलकातायाः वेलुरग्रामे गुरोः रामकृष्णस्य नाम्ना मठं संस्थाप्य सनातनधर्मस्य मौलिकतत्त्वस्य प्रचारेण सह स दरिद्राणां सेवामारभत । रामकृष्णमिशन्माध्यमेन उद्बुद्धैः युवकैः सम्प्रति विश्वस्य अनेकत्र सेवा क्रियते ।

०४, जुलाई , १९०२ मिते दिवसे स इहलीलां समाप्य दिव्यधाम गतवान् । प्रायशः ईश्वरस्य पुत्राः न खलु दीर्घजीविनः । ते सुतरां स्वल्पजीवनेन संसारस्य प्रभूतम् उपकारं कुर्वन्ति । योगजन्मा कालजयी स महापुरुषः अद्यापि विश्वं ज्ञानालोकैरुद्भासयति ।

तस्य स्वप्नस्य अमरवाण्याः च सफलः प्रयोगः तं प्रति यथार्थसम्मानः भविष्यति ।

## टिप्पणी :

अमरधाम – ସ୍ୱର୍ଗଧାମ । प्रत्यागच्छन्ति – ଫେରିଯାନ୍ତି । ज्योतिष्कः – ତାରା । विभाति – ଶୋଭା ପାଆନ୍ତି । यूनाम् – ଯୁବକଯୁବତୀମାନଙ୍କର । कृते – ପାଇଁ । विकिरति – ବିଚ୍ଛୁରିତ କରୁଛି । कुलीन – ଉତ୍ତମ ପରିବାର । जिज्ञासुः – ଜାଣିବାକୁ ଇଚ୍ଛୁକ ବ୍ୟକ୍ତି । प्रतीक्षितः – ଅପେକ୍ଷା କରାଯାଇଥିଲା । प्राच्यदेश – ଭାରତ । पाश्चात्त्यदेश – ଭାରତେତର ଦେଶସମୂହ । निधातुम् – ରଖିବାକୁ । शक्नोति स्म – ସମର୍ଥ ହେଲେ । विश्वविश्रुतः – ବିଶ୍ୱବିଖ୍ୟାତ । विगलित – ତରଳି ଯାଇଥିବା । କଠିନ ନହେବା । सततम् – ସର୍ବଦା । संस्थाप्य – ସ୍ଥାପନ କରି । सनातन – ନିତ୍ୟ, ଶାଶ୍ୱତ । उद्बुद्धः – ପ୍ରଭାବିତ । योगजन्मा – ଶୁଭମୁହୂର୍ତ୍ତରେ ଯାହାଙ୍କ ଜନ୍ମ । ସୌଭାଗ୍ୟବାନ୍ । उद्भासयति – ଆଲୋକିତ କରୁଛି ।

## अभ्यास :

1. **निजभाषया प्रायश: वाक्यत्रयेण उत्तरं लिखत ।**

(क) महामानवा: किं कुर्वन्ति ?

(ख) विश्वकल्याणार्थं कीदृश: शुभमुहूर्त्त: प्रतीक्षित: ?

(ग) विवेकानन्द: कथं स्मृतिपटले सर्वं निधातुं शक्नोति स्म ?

(घ) विवेकानन्द: कथं विश्वप्रसिद्ध: अभवत् ?

(ङ) रामकृष्णमिशन्माध्यमेन किं भवति ?

2. **संक्षेपेण उत्तरं लिखत ।**

(क) कौ विवेकानन्दस्य मातापितरौ ?

(ख) भुवनेश्वरीदेवी विवेकानन्दं स्नेहेन किम् आहूतवती ?

(ग) ईश्वरानुसन्धित्सु: विवेकानन्द: कं निकषा गतवान् ?

(घ) कुत्र तस्य पूर्णविश्वास: जात: ?

(ङ) माता विवेकानन्दं किम् उक्तवती ?

(च) केषां कृते तस्य हृदयं विगलितमासीत् ?

(छ) किं नाम सफलं जीवनम् ?

(ज) उत्तममानव: भवितुं विवेकानन्द: कां पूजयितुं कथयति ?

(झ) वेलुरनगरं कुत्र वर्त्तते ?

(ञ) कदा स दिव्यधाम गतवान् ?

3. **बन्धनीमध्यात् रेखाङ्कितपदस्य कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) स रामकृष्णपरमहंसं निकषा गत्वा पृष्टवान् ।

(कर्मणि द्वितीया, निकषा शब्दयोगे द्वितीया, व्याप्त्यर्थे द्वितीया) ।

(ख) दरिद्राणां कृते तस्य हृदयं विगलितम् आसीत् ।

(कृते शब्दयोगे षष्ठी, सम्बन्धे षष्ठी, कृद्योगे षष्ठी) ।

(ग) पुत्र ! आजीवनं पवित्रो भव । (कर्त्तरि प्रथमा, सम्बोधने प्रथमा, अव्यययोगे प्रथमा)

(घ) उत्तरं रामकृष्णेन प्रदत्तम् । (सहार्थे तृतीया, प्रयोजनार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया)

(ङ) अनेकत्र सेवा क्रियते । (कर्त्तरि प्रथमा, उक्ते कर्मणि प्रथमा, अव्यययोगे प्रथमा)

(च) मौलिकतत्त्वस्य प्रचारेण सह स दरिद्राणां सेवाम् आरभत ।

(अनुक्ते कर्त्तरि तृतीया, सहार्थे तृतीया, प्रयोजनार्थे तृतीया)

**4. वाक्यरचनां कुरुत ।**

इति, नाम्ना, गत्वा, नाम, चिराय, सकृत्, प्रदाय, प्रभूतम् ।

**5. सन्धिं कुरुत ।**

मातुः + उपदेशम् , पवित्रः + भव, दृष्टवान् + अस्मि, उत्तरेण + एव, तम् + एव, सत्यम् + इदम्, वसुधा + एव, अद्य + अपि, उत् + ज्वलम्, सः + अपि, विकासः + च ।

**6. सन्धिविच्छेदं कुरुत ।**

पुनरमरधाम, प्रत्यागच्छन्ति, कूलमानेतुम्, चिरादेव, प्रतीक्षितः, अतीव, सततमचेष्टत, उत्तमो मानवः ।

**7. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) अन्धकाराच्छन्ने (अन्धकारैः आच्छन्नं तस्मिन्, अन्धकाराणाम् आच्छन्नं तस्मिन्, अन्धकारे आच्छन्नं तस्मिन्) ।

(ख) संसारः एव सागरः तस्मिन् (संसारसागरः, संसारसागरे, संसारसागरात्) ।

(ग) रत्नगर्भा (द्वन्द्वः, कर्मधारयः, बहुव्रीहिः) ।

(घ) कल्याणार्थम् (कल्याणस्य इदम्, कल्याणाय इदम्, कल्याणाय इयम्) ।

(ङ) सार्थकं नाम यस्य सः (सार्थकनाम, सार्थकनामा, सार्थकनाम्नी) ।

(च) स्वभावसरलः (द्विगुः, तृतीयातत्पुरुषः, द्वन्द्वः) ।

(छ) देवनिर्दिष्टः (देवेन निर्दिष्टः, देवस्य निर्दिष्टः, देवः निर्दिष्टः) ।

(ज) वेलुरनाम ग्रामःतस्मिन् (वेलुरग्रामः, वेलुरग्रामे, वेलुरग्रामम्) ।

(झ) ईश्वरानुसन्धानम् (कर्मधारयः, अव्ययीभावः, षष्ठी तत्पुरुषसमासः) ।

(ञ) दिव्यपुरुषः (दिव्यः पुरुषः, दिव्यस्य पुरुषस्य, दिव्येन पुरुषः) ।

(ट) स्वस्य जननी तस्याः (स्वजननी, स्वजनन्याः, स्वजनन्या) ।

(ठ) आजीवनम् (आजीवनात्, जीवनं यावत्, जीवनस्य पर्यन्तम्) ।

(ड) कालं जयति इति (कालजयः, कालजयी, कालजयम्) ।

(ढ) ईश्वरविश्वासी (बहुव्रीहिः, उपपदतत्पुरुषः, द्विगुः) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।**

(क) आच्छन्नः = आ + छद् + _____ । (क्त, क्तवतु, शतृ)

(ख) आहूतवती = आ + ह्वे + _____ + (ङीप्) । (शानच्, क्तवतु, शतृ)

(ग) निधातुम् = नि + _____ + तुमुन् । (हा, धा, हु )

(घ) दत्त्वा = _____ + क्त्वा । (दा, धा, हु)

(ङ) उद्बुद्ध = उद् + बुध् + _____। (अल्, क्त, क्तिन् )

(च) प्रतिष्ठिता = प्रति + _____ + क्त । (टाप्) (स्था, ष्ठा, ष्ठै)

(छ) कृत्वा = कृ + _____ । (ल्यप्, क्त्वा, शतृ)

**9. स्त्रीप्रत्यये रूपाणि लिखत –**

कालजयिन्, सरल, उक्तवत्, भवत्, ईश्वर, श्रीमन्, भगवत्, देव, मानव, युवन् ।

■